XXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXX
XXXXXXXXXXXXXXXXXXXXXXXXXXXX
X
X e-text created by muktabodha indological research institute
X
X "sivadharma
X
X copied from ms no r 2442 belonging to g. o. n. l. , madras.)
X
X IFP transcript no. 72 page 1 to 24 copy of adyar library madras. ms. no.: 75429
X
X data entered by the staff of muktabodha under the supervision of mark s. g. dyczkowski
X
X licenced for use under the creative commons attribution non-commercial licence
X
X revision 0 april 5, 2010
X
XXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXX
XXXXXXXXXXXXXXXXXXXXXXXXXXXX

श्रीः

* * * * ॥

शिवोगुरुरिशवो देवः शिवोव * * * * णाम् ।

शिव आत्मा शि * * * * * * * * * * * ॥ १-१ ॥

* * * * * * * * * * * * * * * * * ।

विचित्रं विश्वनिर्माणम् विचित्रं शिवचेष्टितम् ॥ १-२ ॥

विचित्रं शिवमाहात्म्यम् विचित्र * * * * * ।

* * * * * * * * * * तं पापनाशनम्॥ १-३॥

स्वर्गापवर्गयोस्सद्यः साधनन्तद्ब्रवीम्यहम्।

मेरुपृष्ठेसमा * * * * * * * * * * ॥ १-४॥

* * * * * * शान्तं सर्वज्ञं नन्दिकेश्वरम्।

सनत्कुमारः पप्रच्छ शिवधर्मान्यथाक्रमम्॥ १-५॥

श्रीनन्दिकेश्वरः * * * * * * * * * * ।

* * * * * * * * सुखोपायम्महत्फलम्॥ १-६॥

परमं सर्वधर्माणां शिवधर्मं शिवात्मकम्।

शिवेन कथितं पूर्वं पार्वत्याष्षण्मुखस्य च॥ १-७॥

गणानान्देवमुख्यानामस्माकञ्च विशेषतः।

संसारार्णवमग्नानां सर्वेषां प्राणिनामयम्॥ १-८॥

शिवधर्मोऽडुपः श्रीमानुत्तारार्थमुदाहृतः ।

p. 2)

यैरयं शान्त चेतस्कैः शिवभक्तैश्शिवार्थिभिः ॥ १-९ ॥

संसेव्यते परो धर्मस्ते रुद्रा नात्र संशयः ।
ग्रामे वा यदि वारण्ये जले वापि स्थलेऽपि वा ॥ १-१० ॥

यत्रैव विद्यते लिङ्गं सर्वतीर्थानि तत्र वै ।
एककालं द्विकालं वा त्रिकालं नित्यमेव वा ॥ १-११ ॥

ये स्मरन्ति विरूपाक्षं विज्ञेयास्ते गणेश्वराः ।
कीर्तयिष्यन्ति ये रुद्रं सकृदप्याशु ते नराः ॥ १-१२ ॥

सर्वपापैः प्रमुच्यन्ते सप्तजन्मकृतैरपि ।
जातेनात्मद्रुहा येन नार्चितो भगवान् शिवः ॥ १-१३ ॥

सुचिरं सञ्चरत्यस्मिन् संसारे दुःखसागरे ।

सा * * * * * * * * * * स्साम्यमूकता ॥ १-१४ ॥

यत्क्षणं वा मुहूर्तं वा शिवमेकन्न चिन्तयेत् ।

दुर्लभं प्राप्य मानुष्य * * * * * * * * ॥ १-१५ ॥

तेषां हि सफलं जन्म कृतार्थास्ते नरोत्तमाः ।

भवभक्तिपरा ये तु भवप्रणतचेतसः ॥ १-१६ ॥

* * * * * * * * * ते दुःखस्य भाजनम् ।

भवना * * * * * * * * * * * * ॥ १-१७ ॥

* * * * * * * नश्चादृष्टपर्यन्तं शिव ।

* * * * * * भोगान् राज्यं च त्रिदशालये ॥ १-१८ ॥

तेर्चयन्ति सदाकालं हरस्य चरणांबुजम् ।

p. 3)

सौभाग्यं कान्ति * * * * * * * * * * ॥ १-१९ ॥

शौर्यञ्च जगतिख्यातिः शिवमर्चयतो भवेत्।

नारुद्रस्संस्मरेद्रुद्रन्नारुद्रो रुद्रमर्चयेत्॥ १-२०॥

नारु * * * * * * * * * * * माप्नुयात्।

संपर्कात्कौतुकाल्लोभात् भयाद्वापि च संस्मरेत्॥ १-२१॥

कीर्तयेदर्चयेद्वापि सोप्यप * * * * *।

शिवधर्मस्य सारोयं शिवे भक्तिस्सुनिश्चला॥ १-२२॥

सा चाष्टांगी शिवेनोक्ता कार्या नित्यं प्रयत्नतः।

मद्भक्तजनवात्सल्य * पूज * * ञ्चानुमोदनम्॥ १-२३॥

स्वयमभ्यर्चनं भक्त्या ममार्थे चाङ्गचेष्टनम्।

मत्कथा श्रवणे भक्तिस्वरनेत्राङ्गविक्रिया॥ १-२४॥

ममानुस्मरणन्नित्यं यश्चमाञ्चोपजीवति।

भक्तिरष्टविधाह्येषा यस्मिन् म्लेच्छेपि वर्तते॥ १-२५॥

स विप्रेन्द्रो ज्वलः श्रीमान् सयतिस्सच पण्डितः।

न मे प्रियश्चतुर्वेदी मद्भक्तश्श्वपचोऽपि च॥ १-२६॥

तस्मै देयन्ततो ग्राह्यं स च पूज्यो यथाह्यहम्।

पत्रं पुष्पं फलन्तोयं यो मे भक्त्या प्रयच्छति॥ १-२७॥

तस्याहं न प्रणश्यामि स च मे न प्रणश्यति।

यो मान्न सर्वगं पश्येत् सर्वन्नमयि संस्थितम्॥ १-२८॥

p. 4)

समां पर्वतदुर्गेषु मार्गमाणो न पश्यति।

यो मां सर्वगतं पश्येत् सर्वञ्च मयि संस्थितम्॥ १-२९॥

तस्याहन्नित्यमात्मस्थः स च नित्यम्मयिस्थितः।

इति॥

दुर्लभा च शिवे भक्तिः दुर्लभञ्च शिवार्चनम्॥ १-३० ॥

सुदुर्लभं शिवे दानं शिवहोमञ्च दुर्लभम्।
सुदुर्लभं शिवज्ञानं तदभ्यासोऽपि दुर्लभः॥ १-३१ ॥

सुदुर्लभतरं ज्ञेयं जपध्यानं शिवात्मकम्।
सुदुर्लभमिदं ज्ञात्वा शिवेभक्तिं समाश्रयेत्॥ १-३२ ॥

लाभस्तेषाम्मनुष्याणा * * * * * * * *।
षान्दिवा च रात्रौ च नित्यं शिवगता स्मृतिः॥ १-३३ ॥

नमस्कारादिसंयुक्तं शिवायेत्यक्षरत्रयम्।
जिह्वाग्रे * * * * * * * * * * * * ॥ १-१३४ ॥

* * * * * * सेन शिवधर्मोखिलः क्रमात्।
प्रोक्तः प्राथमिकाध्याये शिवधर्मे य ईरितः॥ १-३५ ॥

य इदं पठते नि * * * * * * * * *।

* * * * * * * * * * लोके महीयते ॥ १-३६ ॥

धनमायुर्यशो विद्यां प्रभावमतुलं लभेत् ।

कैलासे शिवसान्निध्ये * * * * * * * * ॥ १-३७ ॥

* * * * * * * * * * श्रीनन्दिकेश्वरः ।

p. 5)

त्वमतीवशिवे भक्तः पद्मयोनिसुतोत्तम ॥ १-३८ ॥

तेन ते निखिलं वक्ष्ये शृणुष्वैकाग्रमानसः ।

पूर्वमेकार्णवे घोरे नष्टे स्थावरजंगमे ॥ १-३९ ॥

विवादस्सुमहानासीत् ब्रह्मविष्णवोः परस्परम् ।

अहं कर्ता त्वहं कर्ता नमत्तोन्यो जगत्पतिः ॥ १-४० ॥

एवमाह हरिं ब्रह्मा ब्रह्माणञ्च हरिस्तथा ।

तयोर्दर्पापहाराय प्रबोधार्थञ्च देवयोः ॥ १-४१ ॥

मध्ये समुद्गतं लिङ्गमैश्वरन्तेजसः परम्।
ज्वालामालामयन्दिव्यमप्रमेयमनूपमम्॥ १-४२॥

योजनायुतविस्तीर्णं स्थितं तद्विमलेम्भसि।
क्षयवृद्धिविनिर्मुक्तमादिमध्यान्तवर्जितम्॥ १-४३॥

ज्वालाभिर्मोहितौ तस्य लिङ्गस्य सुरसत्तमौ।
तदा विस्मयमापन्नौ पश्यन्तावमराधिपौ॥ १-४४॥

गतावूर्ध्वमधस्तस्य संप्रधार्य परस्परम्।
अधो द्रष्टुं गतो विष्णुः ऊर्ध्वञ्चैव पितामहः॥ १-४५॥

अपश्यन्तावधश्चोर्ध्वन्तौ समेत्य परस्परम्।
कृताञ्जलिपुटौ भूत्वा लिङ्गन्तुष्टुवतुस्तदा॥ १-४६॥

नमस्ते ज्ञानलिङ्गाय शिवलिङ्गाय लिङ्गिने।
नमस्ते गूढलिङ्गाय परलिङ्गाय भामिने॥ १-४७॥

नमस्ते ज्योतिलिङ्गाय वेदलिङ्गाय वेधसे ।

p. 6)

नमस्ते सूक्ष्मलिङ्गाय बुद्धिलिङ्गाय बुद्धये ॥ १-४८ ॥

नमः पर्वतलिङ्गाय भावलिङ्गाय ते नमः ।
जगत्कारणलिङ्गाय जगतां पतये नमः ॥ १-४९ ॥

आवयोः पतये चैव पतीनां पतये नमः ।
एवं स्तुत्वा महादेवं प्रणम्य शिरसा च तौ ॥ १-५० ॥

ब्रह्मविष्णूसमापन्नौ भक्त्या परमया युतौ ।
लिङ्गमध्ये परम्मध्यं स्थितं प्रादेशसम्मितम् ॥ १-५१ ॥

समाधिस्तोत्रसंपन्नौ दृष्टवन्तौ शिवात्मकम् ।
नैतच्च काञ्चनं रौप्यं ताम्रं स्फटिकमौक्तिकम् ॥ १-५२ ॥

लक्ष्यमात्रस्थितं शान्तं केवलन्तच्छिवात्मकम् ।

तयोस्तुष्टो महादेवः प्रदाय वरमुत्तमम् ॥ १-५३ ॥

कारणत्वमनुज्ञाय तत्रौवा * * * * * ।

* * * * * ब्रह्माद्यैः प्रतिष्ठाप्य सुरासुराः ॥ १-५४ ॥

तल्लिङ्गानुकृतिं लिङ्गमीडिरे मुनयस्तदा ।

परं गूढशरीरञ्च लिङ्गक्षेत्र * * * * ॥ १-५५ ॥

* * * * * रन्तेजः तल्लिङ्गं पञ्चसङ्गकम् ।

कल्पान्ते तस्य लिङ्गस्य लीयन्ते सर्वदेवताः ॥ १-५६ ॥

दक्षिणे लीयते ब्रह्मा वामतश्च * * * * ।

* * * * व गायत्री सर्ववेदोत्तमोत्तमा ॥ १-५७ ॥

लीयते मूर्ध्नि वै वेदाः सषसङ्गपदक्रमाः ।

जठरे लीयते सर्वं जगत् * * * * * * ॥ १-५८ ॥

* * * * द्यते तस्मात् ब्रह्माद्यं स चराचरम्।

स्थापितं तेन सर्वं स्यात् पूजितञ्च न संशयः ॥ १-५९ ॥

पूर्वं लिङ्गं सम * * * * * * * चक्र तुः।

ब्रह्मा ब्रह्माक्षैरर्दिव्यैः लिङ्गं पूजयते सदा ॥ १-६० ॥

गन्धपुष्पादिभिर्नित्यं विष्णुः पूजय * * *।

* * * * * ते नित्यं लिङ्गं शैलमयं शुभम् ॥ १-६१ ॥

तस्य संपूजनात्तेन प्राप्तं ब्रह्मत्वमुत्तमम्।

शक्रोपि देवराजेन्द्रो * * * * * * * * ॥ १-६२ ॥

* त्तया पूजयते नित्यं तेन शक्रत्वमाप्तवान्।

लिङ्गं हैममयं कान्तं धनदोर्च्चयते सदा ॥ १-६३ ॥

तेनासौ धन * * * * * * * * प्तवान्।

विश्वेदेवा महात्मानो रौप्यं लिङ्गं मनोहरम्॥ १-६४॥

यजन्ते विधिवद्भक्त्या तेन विश्वत्व * * *।

* * पूजयते भक्त्या लिङ्गं पित्तलसंभवम्॥ १-६५॥

वायुत्वन्तेन संप्राप्तं अनौपम्यगुणावहम्।

इन्द्रनीलमयं लिङ्गं विष्णुः पूजयते सदा॥ १-६६॥

विष्णुत्वं प्राप्तवांस्तेन सोत्भुतैकं सनातनम्।

p. 8)

वसवः कांसिकं लिङ्गं पूजयन्ति विधानतः॥ १-६७॥

प्राप्तास्तेन महात्मानो वसुत्वं च महोदयम्।

अश्विनौ पार्थिवं लिङ्गं पूजयन्तौ विधानतः॥ १-६८॥

तेन तावश्विनौ देवौ दिव्यं देहं गतावुभौ।

स्फाटिकं निर्मलं लिङ्गं वरुणोर्चयते सदा॥ १-६९॥

तेन तद्वरुणत्वं हि प्राप्तमृध्या समन्वितम्।

लिङ्गमन्नमयं पुण्यं अग्निरभ्यर्च्य भावितः॥ १-७०॥

मुक्ताफलमयं लिङ्गं सोमः पूजयते सदा।

तेन सोमोऽपि संप्राप्तः सोमत्वं सततोज्वलम्॥ १-७१॥

प्रवालकमयं लिङ्गं यजन्ते पन्नगोत्तमाः।

तेन नागेषु भोगाढ्याः प्राप्तास्ते परमं पदम्॥ १-७२॥

कृष्णाय समयं लिङ्गं पूजयन्त्यसुरोत्तमाः।

राक्षसाश्च महात्मानः तेन तेमित विक्रमाः॥ १-७३॥

त्रपुसीसमयं लिङ्गं पिशाचाः पूजयन्ति ते।

महर्धबलधामानः प्राप्नुवन्ति परं पदम्॥ १-७४॥

(कृष्णायसमयं लिङ्गं)

त्रैलोहिकमयं लिङ्गं यजन्ते गृह्यकोत्तमाः।

तेन योगबलोपेताः प्रयान्तीश्वरमन्दिरम्॥ १-७५॥

(पदे पदान्तरं गत्वा हस्तौ चलनवर्जितौ।
वाचास्तोत्रं मनोध्यानञ्चतुरंगं प्रदक्षिणम्॥

p. 9)

उरसा शिरसा भक्त्या मनसा च धिया दृशा।
पद्भ्यां भुजाभ्यां वाचा च प्रणामोष्टाङ्गमुच्यते॥)

बहुलोहमयं लिङ्गं यजन्ते मातरस्सदा।
मातृत्वं प्राप्यतास्सर्वाः प्रयान्ति परमं पदम्॥ १-७६॥

एवं देवास्सगन्धर्वाः स यक्षोरगराक्षसाः।
पूजयन्ति सदाकालं ईशानं सुरनायकम्॥ १-७७॥

सर्वो लिङ्गमयो लोकः सर्वं लिङ्गे प्रतिष्ठितम्।
तस्मात् संपूजयेल्लिङ्गं यदीच्छेत्सिद्धिमात्मनः॥ १-७८॥

इति शिवधर्मे द्वितीयोध्यायः॥

श्रीः

अथ तृतीयोध्यायः

लिङ्गे देवो महादेवः साक्षादेव व्यवस्थितः।
अनुग्रहाय लोकानां तस्माल्लिङ्गं समर्च्चयेत्॥ २-१॥

यो न पूजयते मोहात् लिङ्गं त्रिभुवनेश्वरम्।
न च स्वर्गस्य मोक्षस्य न च राज्यस्य भाजनम्॥ २-२॥

यस्तु पूजयते नित्यं लिङ्गं त्रिभुवनेश्वरम्।
स स्वर्गमोक्षराज्यानां क्षिप्रं भवति भाजनम्॥ २-३॥

तस्मादेकमना भूत्वा यावज्जीवं प्रतिज्ञया।
अर्चयेत महादेवमापन्नोऽपि सदा बुधः॥ २-४॥

वरं प्राणपरित्यागः छेदनं शिरसोऽपि वा ।

नत्वनभ्यर्च्य भुञ्जीयात् भगवन्तन्त्रिलोचनम् ॥ २-५ ॥

एवन्निर्वहते यस्तु यावज्जीवं(यं) प्रतिज्ञया ।

मनुष्यचर्मणा बद्धः सरुद्रो नात्र संशयः ॥ २-६ ॥

नास्ति लिङ्गार्चनात्पुण्यम् अन्यदप्यधिकं क्वचित् ।

इति विज्ञाय यत्नेन पूजनीयः सदाशिवः ॥ २-७ ॥

मया लिङ्गं द्वेष्टिसम्मोहात् सर्वदेवनमस्कृतम् ।

नरो नरकगामी स्यात् तस्य संभाषणादपि ॥ २-८ ॥

p. 11)

महेश्वरमयं सर्वं त्रैलोक्यं सचराचरम् ।

ते कृतघ्ना भवन्तीह येन भक्ता महेश्वरे ॥ २-९ ॥

सागराणां क्षयोप्यस्ति क्षीयते हिमवानपि ।

रुद्रलोके क्षयो नास्ति शंकरे शरणं गते ॥ २-१० ॥

एष्टव्या बहवः पुत्राः शिवतन्त्रानुसारिणः।

समुद्धरन्ति ते गोत्रं रज्जुः कूपात् घटं यथा॥ २-११॥

लिङ्गद्वयं समाख्यातं चरञ्चाचरमेव च।

चरं प्रतीति विख्यातं अचरं पार्थिवात्मकम्॥ २-१२॥

चरे सदा वसत्येव प्रातियुक्तो महेश्वरः।

अचरे मन्त्रसंस्कारात् वसत्येव सदाशिवः॥ २-१३॥

स्थावरं जङ्गमं चैव द्विविधं लिङ्गमुच्यते।

जङ्गमस्यावमानेन स्थावरं निष्फलं भवेत्॥ २-१४॥

लिङ्गमित्थं प्रतिष्ठाप्य तस्मिन् ध्यायेत् सदाशिवम्।

ध्यानम्

तस्येदमैश्वरं रूपं खण्डचन्द्रावतंसकम्॥ २-१५॥

तमालश्यामलगलं स्फुरत्फालविलोचनम्।

लसद्वामांग नारीकं कृतशेषशुभाङ्गदम्॥ २-१६॥

गङ्गातरङ्गसत्सङ्ग सदाधौतजटाधरम्।

सुराङ्गजरजः पुञ्ज पूजितावयवोज्वलम्॥ २-१७॥

विचित्रगात्रविधृतं महाव्यालविभूषणम्।

p. 12)

महोक्षस्यन्दनगतं विधृताजगवायुधम्॥ २-१८॥

गजाजिनोत्तरासङ्गं दशार्धवदनं गुहम्।

* त्रासितमहामृत्युं महाबलगणावृतम्॥ २-१९॥

शरणार्थीकृतत्राणं नतनिर्वाणकारणम्।

मनोरथपथाथीतं वरदानपरायणम्॥ २-२०॥

इति ध्यात्वा महादेवं अन्तर्यागं समाचरेत्।
तत्र द्रव्याणिमनसा कल्पयित्वा विशोध्य च॥ २-२१॥

ध्यात्वा विनायकं देवं पूजयित्वा विधानतः।
दक्षिणे चोत्तरे चैव नन्दीशं सुयशान्तथा॥ २-२२॥

आराध्य मनसा सम्यगासनं कल्पयेत्ततः।
तस्योपरि शिवं ध्यायेत् साम्बं सर्वमनोहरम्॥ २-२३॥

सर्वलक्षणसंयुक्तं सर्वावयवशोभिनम्।
सर्वातिशयसंयुक्तं सर्वाभरणभूषितम्॥ २-२४॥

रक्तास्यपाणिचरणं कुन्दमन्दस्मिताननम्।
शुद्धस्फटिकसंकाशं फुल्लपद्मत्रिलोचनम्॥ २-२५॥

चतुर्भुजमुदाराङ्गं चारुचन्द्रकलाधरम्।
वरदाभयहस्तं च मृगटंकधरं हरम्॥ २-२६॥

सर्वकल्याणनिलयं चारुनीलगलान्तरम्।

सर्वोपमानरहितं सानुगं सपरिच्छदम्॥ २-२७॥

ततस्सञ्चिन्तयेत्तस्य वामभागे महेश्वरीम्।

p. 13)

प्रफुल्लोत्फलपत्राभविस्तीर्णायतलोचनाम्॥ २-२८॥

पूर्णचन्द्राभवदनां नीलकुन्तलमूर्धजाम्।

नीलोत्पलदलप्रख्यां चन्द्रार्धकृतशेखराम्॥ २-२९॥

अतिवृत्तघनोत्तुङ्गस्निग्धपीनपयोधराम्।

तनुमध्यां पृथुश्रोणीं पीतसूक्ष्मतराम्बराम्॥ २-३०॥

सर्वाभरणसंपन्नां ललाटतिलकोज्वलाम्।

विचित्रपुष्पसङ्कीर्णकेशपाशोपशोभिताम्॥ २-३१॥

सर्वतोनुगुणाकारां किञ्चिल्लज्जाननाम्।

हेमारविन्दं विकसत् दधानां दक्षिणे करे ॥ २-३२ ॥

दण्डवच्चापर(न्त्य)म् हस्तन्यस्यासीनां सहासने ।
एवं देवं च देवीं च ध्यायेत्सनवरे शुभे ॥ २-३३ ॥

सर्वोपचारवद्भक्त्या भावपुष्पैस्समर्चयेत् ।
ध्यात्वा वाह्यक्रमेणैव पूजान्निर्वर्तयेद्धिया ॥ २-३४ ॥

समिदाज्यादिभिः पश्चात् नाभौ होमं च भावयेत् ।
भ्रूमध्ये च शिवं ध्यायेत् शुद्धदीपशिखाकृतिम् ॥ २-३५ ॥

अथ चिन्तामयं सर्वं समाप्याराधनक्रमम् ।
लिङ्गे च पूजयेद्देवं सर्वदेवशिखामणिम् ॥ २-३६ ॥

केचिद्विश्वेश्वरं देवं केचिद्धालास्य संज्ञितम् ।
केचिच्छ्रीसोमनाथाख्यं केचित्केदारमद्भुतम् ॥ २-३७ ॥

केचिच्छ्रीपर्वतं मुख्यं केचिद्गोपर्वतन्नराः ।

केचिद्दक्षिणकैलासं केचिद्वृद्धा चलाभिधम्॥ २-३८॥

p. 14)

केचिद् रामेश्वरं पुण्यं वेदकान्तारमद्भुतम्।

(प्राप्यपूर्वोक्तमार्गेण) प्राप्य पूर्वोक्तमार्गेण पूजयित्वा

द्विजोत्तमाः॥ २-३९॥

अनायासेन संसारात् विमुक्ता भवबन्धनात्।

किमत्र बहुनोक्तेन श्रूयतां मुनिपुङ्गवाः॥ २-४०॥

पूजयध्वं महादेवं भुक्तिमुक्तिफलप्रदम्।

पूजिते देवदेवेशे पुराणे सर्व * * णे॥ २-४१॥

पूजितास्सर्वदेवाश्च इति वेदान्तनिर्णयः॥ २-४०॥

अस्य पूर्वमुखं सौम्यं बालार्कसदृशप्रभम्।

त्रिलोचनारविन्दाढ्यं कृतबालेन्दुशेखरम्॥ २-४१॥

दक्षिणन्नीलजीमूतसमानरुचिरप्रभम्।

भ्रुकुटीकुटिलं घोरं रक्तवृत्तेक्षणत्रयम्॥ २-४२॥

दंष्ट्राकरालन्दुर्धर्षं स्फुरिताधरपल्लवम्।

इन्दुरेखाकृतोत्तंसमूर्ध्वज्वलितमूर्धजम्॥ २-४३॥

उत्तरं विक्रमप्रख्यं नीलालकविभूषितम्।

सविलासं त्रिणयनञ्चान्द्राभरणभास्वरम्॥ २-४४॥

पश्चिमं पूर्णचन्द्राभं लोचनत्रितयोज्वलम्।

चन्द्ररेखाधरं सोम्यं मन्दस्मितमनोहरम्॥ २-४५॥

पश्चिमं स्फाटिकप्रख्यं इन्दुरेखासमुज्वलम्।

अतीव सोम्यमुत्फुल्ललोचनत्रितयोज्वलम्॥ २-४६॥

इति शिवधर्मे तृतीयोध्यायः॥

श्रीः

अथ चतुर्थोऽध्यायः

रुद्राक्षवृक्षास्तपनाक्षिजाताः

ते द्वादशास्याः कपिलाप्रभेदैः।

चन्द्राक्षिजाः षोडशशुभ्रवर्णाः

कृष्ण * * दशास्युः ज्वलनाक्षिजाताः॥ ३-१॥

ब्राह्मं सितं कापिलवर्णयुक्तं

क्षात्रं तु वैश्यं ह्युभयात्मकं तत्।

कृष्णं तु शूद्रं कथयन्ति बीजं

रुद्राक्षबीजप्रभवन्तु जात्या॥ ३-२॥

एकाननं शङ्कर एव साक्षात्

रुद्राक्षबीजं विनिहन्ति हत्याम्।

द्विवक्त्रबीजं बहुगोवधघ्नं

देवेशदैवत्यमलभ्यमक्ष्णाम्॥ ३-३॥

आग्नेयमुक्तं वदनत्रयन्तु

योषिद्वधघ्नं दधतां क्षणेन ।

चतुर्मुखं यच्चतुराननीयं

नरस्य हत्यां क्षणतो निहन्ति ॥ ३-४ ॥

p. 16)

कालाग्नि * * ण तु पञ्चवक्त्रं

भक्ष्यदुस्सङ्गपातकघ्नम् ।

स्कान्दं हि यत् षड्वदनं करेण

नरेण धार्यं द्विजहन्तृ मध्ये ॥ ३-५ ॥

सप्ताननं भोगिपतिह्यनन्तत्

स्तेयाद्विशुद्धिं विदधाति सद्यः ।

वैनायकं ह्यष्टमुखं सुवर्णं

कूटं गुरुस्त्रीगमनाद्यघघ्नम् ॥ ३-६ ॥

तवाननं भैरव एव देवो

भुक्तिं च मुक्तिं शिवतुल्यकीर्तिम्।

करोति वामेन करेण धार्यं

हत्यायुतानां विनिहन्तिकोटिम्॥ ३-७॥

हरिस्स्वयं यद्दशवक्त्रबीजं

पिशाच भूतग्रहराक्षसाश्च।

वेताल सर्पप्रतियोधिसिह्म

व्यादिकांस्तांश्च निहन्ति शीघ्रम्॥ ३-८॥

एकादशास्यं दशचैकरौद्रं

धार्यं शिखायां विधिनानवद्ये।

नराश्वमेधायुतवाजपेय-

सहस्त्रगोदानसहस्त्रतुल्यम्॥ ३-९॥

p. 17)

यद्वक्त्राणि दशद्वयेन कथितं तद्भास्करीयं स्मृतं कण्ठस्थं

रवितुष्टि कृद्धयमखैस्सम्यक्तपुण्यैस्सममम् हस्त्यश्व श्व

सृगालमूषिकखगक्लीबान्धनारीमृगव्यालश्शुकभेकसर्पमहिष-

व्याधातदोषापहम् ॥ ३-१० ॥

यद्वक्राणि दशद्वयञ्च न लभेत् तत्कार्तिकेयं स्मृतं
सर्वं सिद्धयति भोगभोग्यमखिलं सिद्धयेत् तत् पादुका ।
इष्टार्थाश्चरसारसाधनमथ भ्रूणार्यमाता
पितृभ्रातृस्त्री वसतो विशुद्धयति दधन्नास्मात् परं विद्यते ॥ ३-११ ॥

रुद्राक्षमेकं शिखयापि धार्यं
षट्त्रिंशमालाविदधीतमूर्ध्नि ।
द्वात्रिंशकैः कर्णयुगे च साध्या
शतार्धकृत्ता हृदयेक्षमाला ॥ ३-१२ ॥

कण्ठे धृता येन सदाक्षमाला
जस्त्वाप्नुयाद्यज्ञसहस्त्रपुण्यम् ।
श्वेतं रक्तमथापि पीतमसितं विप्रादिकानां स्मृतं
रुद्राक्षन्नलभेद्यथा गतमिदन्धार्यं शिखायां करे ॥ ३-१३ ॥

कण्ठे कर्णयुगोपवीतहृदयेष्वाबध्यरौप्यादिभिः

पञ्चार्णप्रणवात्मकाख्यमनुभिः कोवानवद्ये भवेत्।

स्नाने वा जपहोमयोर्व्रतविधौ देवार्चनादानयोः

दीक्षाश्राद्धकयोः कृतौभसभसितो रुद्राक्षमालाधरः॥

कुर्यात्कर्म च वै कञ्च सकलं स्यादक्षयं यत्फलं

p. 18)

नो चेद्यर्थमिदं भवत्ययमहो पापो नवद्ये ध्रुवम्।

केचित् सूतकशाव * * * मलोत्सर्गे च सङ्गे स्त्रियः

शुद्धावक्षकमालिकान्न दधते त्यायुः क्षयस्यादिति॥ ३-१५॥

अन्ये पापहरं सदा धृतमिति प्रोच्यं भुजे कर्णयोः

अक्षं मन्त्रपुरस्सरं तु महती माला न धार्या शुचौ।

पापिष्ठोपि नरोक्षमेकमपि वा धत्ते स शुद्धो भवेत्

कुर्वन्वापि न लिप्यते ह्यनुचिते तत्तन्मुखाक्षोदितैः॥ ३-१६॥

पुश्छं योज्य मुखं मुखेन सदृशं मुक्ताप्रवालान्तरैः

सौवर्णैर्मणिभिर्दधन्मखफलं मर्त्यो नवद्यो भवेत्।

रुद्राक्षं वपुषा दधन्यदि मृतश्चानोऽपि मुक्तो भवेत्।
खादन्नन्त्यमुहूर्तके शिवपुरं गच्छेत् स नो जायते॥ ३-१७॥

किन्नूक्तैर्बहुभिस्समन्त्रकमिदं स्वाङ्गे सदाधारकः
संसारन्नपुनः प्रयाति मनुजो वक्ष्ये नवद्ये तव।
बध्वास्वर्णेन रुद्राक्षं रजते नाथ वा मुने।
शिखायां धारयेन्नित्यं कर्णयोर्वा समाहितः॥ ३-१८॥

यज्ञोपवीते हस्ते वा कण्ठदेशेथवा नरः।
श्रीमत्पञ्चाक्षरेणैव प्रणवेनैव वाथवा॥ ३-१९॥

आत्ममन्त्रेण मेधावी रुद्राक्षन्धारयेन्मुदा।
रुद्राक्षधारणं साक्षात् शिवज्ञानस्य साधनम्॥ ३-२०॥

सर्वाश्रमाणां वर्णानां रुद्राक्षाणाञ्च धारणम्।

p. 19) कर्तव्यं मन्त्रतः प्रोक्तं द्विजानान्नान्यवर्णिनाम्॥ ३-२१॥

रुद्राक्षधारणे लज्जा येषामस्ति महामुने ।
तेषान्नास्ति विनिर्मोक्षः संसाराज्जन्मकोटिभिः ॥ ३-२२ ॥

रुद्राक्षधारिणं दृष्ट्वा परिवादं करोति यः ।
उत्पत्तौ तस्य सांकर्यमस्त्येवेति विनिश्चयः ॥ ३-२३ ॥

अमन्त्रकं वा मन्त्रेण सहितं भाववर्जितम् ।
यो वा कोवा नरो नित्यं धारयेल्लज्जया विना ॥ ३-२४ ॥

सर्वपापविनिर्मुक्तः सम्यक् ज्ञानमवाप्नुयात् ।
अहो रुद्राक्षमाहात्म्यं मया वक्तुं न शक्यते ॥ ३-२५ ॥

तस्मात्त्वं सर्वयत्नेन कुरु रुद्राक्षधारणम् ।
तस्मात्सर्वैस्सदा कार्यं रुद्राक्षाणाञ्च धारणम् ॥ ३-२६ ॥

भोगमोक्षप्रदं पुंसां मया चैतद्धृतं सदा ।
रुद्राक्षधारणाच्छ्रेष्ठं न किञ्चिदिह विद्यते ॥ ३-२७ ॥

इति श्रीशिवधर्मे चतुर्थो ध्यायः ॥

p. 20)

श्रीः

अथ पञ्चमोध्यायः

ईश्वरः । त्रिपुरहर शिवादिदेवशंभो
त्रिणयन शङ्कर रुद्रशूलपाणे ।
भवशरणमितीरयन्ति येऽस्मिन्
भवजलधौ न पतन्ति ते मनुष्याः ॥ ४-१ ॥

शैवे । ओं नमो नीलकण्ठाय इति पुण्याक्षराष्टकम्
मन्त्रमाहसकृद्वा यमपातकैस्तु प्रमुच्यते ॥ ४-२ ॥

नवांबुनिधिसन्त * * न पात्रन्दृदीकृतम् ।
स्वर्गारोहणनिश्रेणी महादेवेति कीर्तनम् ॥ ४-३ ॥

विमोचनं हि बन्धानामन्धानान्नधनौषधम्।

दीनानामाश्रयस्थानं महादेवेति कीर्तनम्॥ ४-४॥

महादेवेति वाग्वल्ली चतुरक्षरपल्लवा।

भक्तिसिक्ताफलत्येका चतुर्वर्गफलान्यहो॥ ४-५॥

महादेव महादेव महादेवेत्ययं ध्वनिः।

सुधियो मुक्तिकान्तायाः पाणिग्रहणडिण्डिमः॥ ४-६॥

कोटयो ब्रह्महत्यानामगम्यागमकोटयः।

सद्यः प्रलयमायान्ति महादेवेतिकार्तनात्॥ ४-७॥

p. 21)

शिवेति मङ्गलन्नाम यस्य वाचि प्रवर्तते।

भस्मीभवन्ति तस्याशु महापातककोटयः॥ ४-८॥

प्राणप्रयाणपाथेयं संसारव्याधिभेषजम्।

अनन्तदुःखशमनं शिव इत्यक्षरद्वयम्॥ ४-९॥

शिव इत्येष शब्दोऽस्ति वागास्ति वशवर्तिनी ।
तथापि नरके मर्त्यः पतन्तीत्यतिसाहसम् ॥ ४-१० ॥

शिवे त्रिवाचं यो नित्यं चण्डालोऽपि वदेन्मुदा ।
सहतेव वदेद्वाचं सह तेन वसेत् सदा ॥ ४-११ ॥

प्रसंङ्गात् कौतुकाल्लोभात् भयादज्ञानतोऽपि वा ।
हर इत्युच्चरन्मर्त्यः सर्वपापैः प्रमुच्यते ॥ ४-२ ॥

आहर प्रहरसंहरेति च व्याहरन् सकृदघैः प्रमुच्यते ।
मोचयेत् प्रकृतिकामकर्मतो नामकीर्तनमुमापतेस्सदा ॥ ४-१३ ॥

आदौ नमः प्रयोक्तव्यं शिवायेत्यक्षरत्रयम् ।
जिह्वायां वर्तते यस्य सफलन्तस्य जीवितम् ॥ ४-१४ ॥

किन्तस्य बहुभिर्मन्त्रैः शास्त्रैर्वा बहुविस्तरैः ।
यस्योन्नमश्शिवायेति मन्त्रोयं हृदि वर्तते ॥ ४-१५ ॥

तेनाधीतं श्रुतं सर्वं तेन सर्वमनुष्ठितम्।
यस्योन्नमश्शिवायेति मन्त्राभ्यासस्थिरीकृतः॥ ४-१६॥

यः प्रातः देवदेवेशं शिवलिङ्गस्वरूपिणम्।
पश्येत् सयाति सर्वस्मादधिकां गतिमुत्तमाम्॥ ४-१७॥

p. 22) मध्याह्ने च महादेवं दृष्ट्वा यज्ञफलं लभेत्।
सायाह्ने सर्वयज्ञानां फलमाप्य विमुच्यते॥ ४-१८॥

न प्रदोषे हरिं पश्येत् त्रयोदश्यां विशेषतः।
यदि प्रमादात् पश्येद्वा द्वादशाब्दवृषक्षयः॥ ४-१९॥

त्रयोदश्यान्तथा रात्रौ सोपहारं त्रिलोचनम्।
दृष्ट्वाश्वमेधमाप्नोति मुच्यते सर्वपातकैः॥ ४-२०॥

गङ्गापुष्करकेदारनैमिशादीन्यनेकशः।
तीर्थस्नानेन यत्पुण्यं शिवन्दृष्ट्वैव तल्लभेत्॥ ४-२१॥

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।

यस्स्मरेत् सदा रुद्रं शुद्ध एव न संशयः ॥ ४-२२ ॥

ये वाञ्छन्ति महाभोगान् राज्यञ्च त्रिदशालयम् ।

अर्चयन्तु सदा भक्त्या हरस्य चरणांबुजम् ॥ ४-२३ ॥

ब्रह्मणस्सृष्टिकर्तृत्वं विष्णोर्दानवमर्दनम् ।

स्वर्गाधिपत्यमिन्द्रस्य शिवपूजाविधेः फलम् ॥ ४-२४ ॥

सौभाग्यं कान्तिमद्रूपं सत्यन्त्यागः प्रवक्तृता ।

शोर्यञ्च जगति ख्यातिः शिवपूजाविधेः फलम् ॥ ४-२५ ॥

यद्द्वारे मत्तमातङ्गाः वायुवेगास्तुरंगमाः ।

पूर्णेन्दुवदनानार्यः शिव * * * * फलम् ॥ ४-२६ ॥

भवनानि मनोज्ञानि विद्या ज्ञानं शिवे रतिः ।

धनञ्चादृष्टपर्यन्तं शिव * * * * फलम् ॥ ४-२७ ॥

आयुरारोग्यमैश्वर्यं सत्पुत्राः सुखसंपदः ।
स्वर्गापवर्गौ धर्मश्च शिव * * * * फलम् ॥ ४-२८ ॥

लिङ्गार्चनरतो नित्यं महापातकसंभवैः ।
दोषैः कृतैर्नलिप्येत पद्मपत्रमिवांभसा ॥ ४-२९ ॥

मेरुमन्दरतुल्यानि पापानि सुबहून्यपि ।
ईश्वरं वैद्यमासाद्य नश्यन्ते दुष्टरोगवत् ॥ ४-३० ॥

कायास्सन्ति हि सापायाः संपदः पदमापदाम् ।
समागमास्सापगमाः सर्वमुत्पातभङ्गुरम् ॥ ४-३१ ॥

पुनर्जन्म पुनर्मृत्युः पुनः क्लेशपरंपरा ।
अघरट्टघटन्यायो न कदाचिदनीदृशम् ॥ ४-३२ ॥

मेरुपृष्ठे प्रयागे च गङ्गासागरनैमिशे ।

हिमवन्ते तपस्तप्तं तत्फलं लिङ्गपूजने ॥ ४-३३ ॥

किमत्र ग्रन्धमालाभिः संक्षेपादुपदिश्यते ।

विमुक्तसर्वव्यापाराः जनाः पूजयतेश्वरम् ॥ ४-३४ ॥

किं विद्यैरखिलैश्शास्त्रैः दान यज्ञव्रतादिभिः ।

शिवस्संपूज्यतान्नित्यमुपदेशोयमुत्तमम् ॥ ४-३५ ॥

अयमेव परो धर्मः पूज्यते च सदाशिवः ।

एतावद्धि शिवज्ञानं एतावद्धिपरं पदम् ॥ ४-३६ ॥

ईश्वरः । भस्मविद्धि परंब्रह्मसत्यं बोधसुखाद्वयम् ।

भत्सनात्सर्वपापानां पाशानाञ्च महामुने ॥ ४-३७ ॥

p. 24)

भयेभ्यो रक्षणाद्रक्षा भासनाद्भसितं तथा ।

क्षारयत्यखिलं दोषं ततः क्षारमुदाहृतम् ॥ ४-३८ ॥

गौणन्नानाविधं विद्धि ब्रह्मन् ब्रह्मविदांवर ।
अग्निहोत्राग्निजन्तद्वत् विरजाहोमजं मुने ॥ ४-३९ ॥

औपासनसमुत्पन्नं ग्रहस्थानां विधीयते ।
समिदग्निसमुत्पन्नं धार्यं वै ब्रह्मचारिणाम् ॥ ४-४० ॥

शूद्राणां श्रोत्रियागारे पचनाग्निसमुद्भवम् ।
अन्येषामपि सर्वेषां धार्यन्दावानलोद्भवम् ॥ ४-४१ ॥

पञ्चाक्षरेण मन्त्रेण प्रणवेन युतेन च ।
ललाटे हृदये चैव दो * ये च महामुने ॥ ४-४२ ॥

त्रिपुण्ड्रं धारयेन्नित्यं ग्रहस्थश्च वनाश्रमी ।
अन्येषामपि सर्वेषां विनामन्त्रेण सुव्रत ॥ ४-४३ ॥

उद्धूलनं त्रिपुण्ड्रं च कर्तव्यम् भक्तितो मुने ।

इति शिवधर्मे पञ्चमोध्यायः ॥